শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৰিতার্কিককেসরী।
ৰেদান্তাচার্যৰর্যো মে সন্নিধত্তাং সদা হৃদি॥

বলিরাজেন্দ্রেণোক্তম্

# ॥শ্রীহরিনামমালাস্তোত্রম্ ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥শ্রীহরিনামমালাস্তোত্রম্ ॥

গোৱিন্দং গোকুলানন্দং গোপালং গোপিৱল্লভম্।
গোৱর্ধনোদ্ধরং ধীরং তং ৱন্দে গোমতীপ্রিযম্॥ ১ ॥

নারাযণং নিরাকারং নরৱীরং নরোত্তমম্।
নৃসিংহং নাগনাথং চ তং ৱন্দে নরকান্তকম্॥ ২ ॥

পীতাম্বরং পদ্মনাভং পদ্মাক্ষং পুরুষোত্তমম্।
পৱিত্রং পরমানন্দং তং ৱন্দে পরমেশ্বরম্॥ ৩ ॥

রাঘৱং রামচন্দ্রং চ রাৱণারিং রমাপতিম্।
রাজীৱলোচনং রামং তং ৱন্দে রঘুনন্দনম্॥ ৪ ॥

ৱামনং ৱিশ্বরূপং চ ৱাসুদেৱং চ ৱিঠ্ঠলম্।
ৱিশ্বেশ্বরং ৱিভুং ৱ্যাসং তং ৱন্দে ৱেদৱল্লভম্॥ ৫ ॥

দামোদরং দিৱ্যসিংহং দযালুং দীননাযকম্।
দৈত্যারিং দেৱদেৱেশং তং ৱন্দে দেৱকীসুতম্॥ ৬ ॥

মুরারিং মাধৱং মতস্যং মুকুন্দং মুষ্টিমর্দনম্।
মুঞ্জকেশং মহাবাহুং তং ৱন্দে মধুসূদনম্॥ ৭ ॥

কেশৱং কমলাকান্তং কামেশং কৌস্তুভপ্রিযম্।
কৌমোদকীধরং কৃষ্ণং তং ৱন্দে কৌরৱান্তকম্॥ ৮ ॥

ভূধরং ভুৱনানন্দং ভূতেশং ভূতনাযকম্।
ভাৱনৈকং ভুজঙ্গেশং তং ৱন্দে ভৱনাশনম্॥ ৯ ॥

জনার্দনং জগন্নাথং জগজ্জাড্যৱিনাশকম্।
জামদগ্ন্যং ৱরং জ্যোতিস্তং ৱন্দে জলশাযিনম্॥ ১০ ॥

চতুর্ভুজং চিদানন্দং চাণূরমল্লমর্দনম্।
চরাচরগতং দেৱং তং ৱন্দে চক্রপাণিনম্॥ ১১ ॥

শ্রিয়ঃকরং শ্রিয়োনাথং শ্রীধরং শ্রীৱরপ্রদম্।
শ্রীৱতসলধরং সৌম্যং তং ৱন্দে শ্রীসুরেশ্বরম্॥ ১২ ॥

যোগীশ্বরং যজ্ঞপতিং যশোদানন্দদাযকম্।
যমুনাজলকল্লোলং তং ৱন্দে যদুনাযকম্॥ ১৩ ॥

শালগ্রামশিলশুদ্ধং শঙ্খচক্রোপশোভিতম্।
সুরাসুরৈসসদা সেৱ্যং তং ৱন্দে সাধুৱল্লভম্॥ ১৪ ॥

ত্রিৱিক্রমং তপোমূর্তিং ত্রিৱিধাঘৌঘনাশনম্।
ত্রিস্থলং তীর্থরাজেন্দ্রং তং ৱন্দে তুলসীপ্রিযম্॥ ১৫ ॥

অনন্তমাদিপুরুষমচ্যুতং চ ৱরপ্রদম্।
আনন্দং চ সদানন্দং তং ৱন্দে চাঘনাশনম্॥ ১৬ ॥

লীলযা ধৃতভূভারং লোকসত্ত্বৈকৱন্দিতম্।
লোকেশ্বরং চ শ্রীকান্তং তং ৱন্দে লক্ষমণপ্রিযম্॥ ১৭ ॥

হরিং চ হরিণাক্ষং চ হরিনাথং হরিপ্রিযম্।
হলাযুধসহাযং চ তং ৱন্দে হনুমতপতিম্॥ ১৮ ॥

হরিনামকৃতামালা পৱিত্রা পাপনাশিনী।
বলিরাজেন্দ্রেণ চোক্তা কণ্ঠে ধার্যা প্রযত্নতঃ॥ ১৯ ॥

॥ ইতি শ্রীহরিনামমালাস্তোত্রং সম্পূর্ণম্॥